श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गरुडद्वादशनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गरुडद्वादशनामस्तोत्रम् ॥

अस्य श्री गरुड द्वादश नाम स्तोत्र महामन्त्रस्य।
काश्यप ऋषिः।
त्रिष्टुप् छन्दः।
श्रीगरुडो देवता।
ओं बीजम्।
क्षं शक्तिः।
पं कीलकम्।
श्री गरुड प्रीत्यर्थे जपे विनियोगः॥

## ध्यानम्

अमृतकलशहस्तं कान्तिसंपूर्णदेहं
सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम्।
विविध विमल पक्षैः धूयमानाण्डगोलं
सकलविषविनाशं चिन्तयेत् पक्षिराजम्॥

सुपर्णः प्रथमं नाम द्वितीयं वैनतेयकः।
नागारिस्तु तृतीयं स्यात् चतुर्थं नागभूषणः॥ 1 ॥

जितान्तकः पञ्चमं स्यात् जितामित्रस्तु षष्ठकम्।
अजितः सप्तमं चेति अष्टमं सर्वतोमुखः॥ 2 ॥

गरुत्मान् नवमं नाम दशमं तु खगेश्वरः।
एकादशं तु तार्क्ष्यः स्यात् द्वादशं कश्यप नन्दनः॥ 3 ॥

द्वादशैतानि नामानि गरुडस्य महात्मनः।
यः पठेत् प्रातरुत्थाय स्नानसन्ध्याद्यनन्तरम्॥ 4॥

विषं नाक्रमते तस्य न च हिंसन्ति पन्नगाः।
सङ्ग्रामे व्यवहारेऽपि जयमाप्नोति मानवः।
बन्धनान्मोक्षमाप्नोति सर्वसिद्धिमवाप्नुयात्॥ 5॥

॥ श्री गरुडद्वादशनामस्तोत्रं समाप्तम्॥